Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# पुरुषार्थचतुष्टयः



साधुः मुनिवत्सलदासः
गुरुवर्याः श्रीमाधवप्रियदासजीस्वामिनः ,
श्रीसोमनाथ संस्कृत युनिवर्सिटी,
वेरावलम् ।

**Article Info**
Volume 3, Issue 5
Page Number: 38-43
Publication Issue :
September-October-2020

**Article History**
Accepted : 10 Sep 2020
Published : 23 Sep 2020

**शोध आलेख सार**

शास्त्रानुरीत्या चतुर्विधपुरुषार्थप्राप्तये सर्वेषामपि मनुष्याणां प्रवृत्तिस्स्यात् चेत् पुरुषार्थसिद्ध्या सहास्माकं राष्ट्रस्यार्थिकविकासः, सामाजिकविकासः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागः, एकतायाः समर्थनं तद्रक्षणञ्च, प्रादेशिकधार्मिकभेदेभ्यः परं स्थित्वा वसुधैव कुटुम्बकम् इति समानबन्धुत्वभावनायाः वृद्धिः, प्राकृतिकपर्यावरणरक्षा तत्सुधारणा च अवश्यंभाविनी ।

**मुख्य शब्द** – पुरुषार्थचतुष्टयः ,संस्कृत, मानवजीवनः, लक्ष्यम्, धर्मः, अर्थम्, कामः, मोक्षः।

**पुरुषैः अर्थ्यते इति पुरुषार्थः ।** मानवजीवनस्य चतुर्विधं लक्ष्यम् तत् पुरुषार्थचतुष्टयमिति नाम्ना प्रसिद्धम् । ते च धर्मः, अर्थम्, कामः मोक्षश्चेति । मनुष्यः एतेषां प्राप्तये प्रयतते आजीवनम् । स्वरुचिशक्त्यनुगुणं मनुष्यः पुरुषार्थप्राप्तये यतते । चतुर्विधपुरुषार्थेषु मोक्षः परमो पुरुषार्थः, यतोहि धर्मार्थकामाः तस्य सहायकाः सन्ति ।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

पुरुषस्य प्रयोजनमुद्दिश्य प्रकृते प्रवर्तनात् पुरुषार्थः । चतुर्विधे पुरुषार्षे मोक्ष एव परमपुरुषार्थः । दुःखात्यन्तनिवृत्तिरूपमुख्यप्रयोजनस्य अन्येच्छानधीनेच्छाविषयत्वात् प्राधान्यम् । धर्मार्थकामास्तु तत्साधनानि, तत्रापि धर्मोऽर्थस्य साधनम्, अर्थः कामस्य साधनमिति ।

प्रभुः जीवानां सुखाय विश्वस्य उत्पत्तिस्थितिसंहारान् करोति, तत्रास्य प्रभोः कश्चिदपि स्वार्थः नैव विद्यते । तदुक्तञ्च श्रीमद्भागवते दशमस्कन्धे यथा –

**बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः ।**
**मात्रार्थं च भवार्थं च ह्यात्मनेऽकल्पनाय च ।।**[1]

मीयन्ते जीवैः करणद्वारानुभूयन्ते इति मात्रा विषयाः, तदर्थं मात्रार्थम् । भूयते सत्कर्मभिर्देवादियोनिषु प्रादुर्भूयते इति भवः, तदर्थं भवार्थम् । प्रभुः जनानां बुद्धीन्द्रियमनःप्राणान् मात्रार्थं भवार्थं परमात्मप्राप्तिलक्षणमोक्षार्थं कल्प्यते । धर्मादिसम्पादनार्थं समर्थी भूयतेऽनेनेति कल्पनमर्थः तदर्थम् अर्थात् कामधर्ममोक्षार्थाख्यचतुर्विधपुरुषारर्थसिद्ध्यर्थम् असृजत् ।

**धर्मः-**

धर्मार्थकाममोक्षभेदेन मानवजन्मनः चत्वारः पुरुषार्था विभाजिताः ऋषिभिः। तत्र चतुर्णां पुरुषार्थाणां क्रमशः स्थानं सप्रयोजनम् यथा धर्मः, अर्थः, कामः मोक्षश्च । अत्र धर्ममोक्षयोर्मध्ये अर्थकामयोः क्रमः ऋषिभिः सम्यक् विचिन्त्येव कृतः । यतोहि मनुष्यजीवने प्रथमं सोपानं धर्मः, धर्ममनुसृत्यैव अर्थोपार्जनं, तेनार्थेनैव कामनापरिपूर्तिः तथा च धर्ममार्गेण अर्थकामना सह अन्तिमं लक्ष्यं मोक्षोऽपि समुपलभ्यते । तेषु चतुर्विधेषु पुरुषार्थेषु मनुष्यजीवनस्य पथप्रदर्शकरूपेण तथा नियन्तृरूपेण धर्म एवावतिष्ठते । वस्तुतस्तु मानवजीवने प्रतिक्षणं धर्मस्य प्रभावः साक्षात् परम्परया वा दृश्यते ।

“**धर्मो ज्ञेयः सदाचारः श्रुतिस्मृत्युपपादितः**”[2] इति भगवता श्रीस्वामिनारायणेन स्वलिखितायां शिक्षापत्र्यां धर्मस्य लक्षणं लक्षितम् । आचारस्य आत्मना सह प्रत्यक्षसम्बन्धः । यथा भोजनेन स्वोदरपूर्तिः तद्वत् धर्माचरणेन स्वकीयपुण्यसञ्चयः । आत्मा तु शाश्वतश्चेत् धर्मोऽपि शाश्वतरूपेण तिष्ठति । भगवता श्रीकृष्णेन गीतायां प्रोक्तं यत् – **यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।**[3]
अर्थात् श्रेष्ठः पुरुषः यदाचरति, अन्ये जनाः तदेव अनुसरन्ति । सः यत् प्रमाणीक्रियते मनुष्याः तमेव आचरन्ति ।

शीलेन विना मनुष्यजीवनं निरर्थकं भवति । यथा सौन्दर्यमस्ति चेदपि कुसुमे सुगन्धं नास्ति चेत् तत् केवलं दर्शनसुखकरं भवति, न तु मनोरञ्जकम् तथैव आचारहीनः जनः दर्शनसौख्याय न तु नमस्काराय ।

**अर्थः-**

चतुर्विधपुरुषार्थेषु अर्थोपार्जनं व्यावहारिक जीवने पारमार्थिकसाधनसिद्धये च आवश्यकम् । विना अर्थं इह लोके किं कर्तव्यम् ? सर्वेऽपि मनुष्याः अर्थोपार्जनाय अहोरात्रं प्रयत्नशीलाः भवन्ति । धर्मेण अर्थो साध्यः न तु अधर्मेण ।

केचन जनाः अर्थप्राप्तये मरणासन्ना भवन्ति । तदुक्तम् आङ्गलभाषायाम् यत् – BURNING DESIRE FOR WEALTH. केषांचित् धनक्षये वर्धति जाठराग्निः । धनप्राप्त्या गर्विष्ठाश्च भवन्ति केचन ।

In hinduism, artha is one of the four goals of life, known as purusharthas.

जीवनयापनाय अर्थस्यावश्यकता सर्वथा वर्तते । यस्याम् आवश्यकतायां मानवजीवनस्य ऐहिकम् आमुष्मिकञ्च साक्षात् सिद्ध्यति । जीवनस्य सर्वाण्यपि प्रयोजनानि अर्थमूलानि एव । स एवार्थसंज्ञः वाच्यः अयम् ।

अर्थे एव सर्वेऽपि गुणाः समाहिताः सन्ति । अर्थसत्त्वे तद्दोषा अपि कुत्रचित् गुणाः प्रतीयन्ते । यस्य पार्श्वे धनमस्ति स एव समाजे प्रतिष्ठितः उच्चकुलोत्पन्नः स एव पण्डितः वक्ता गुणवान् दर्शनीयश्च । अत एव भर्तृहरिणा नीतिशतके निरूपितं यत् –

**यस्यास्ति वित्तं स नरः कुलीनः, स पण्डितः स श्रुतवान् गुणज्ञः ।**
**स एव वक्ता स च दर्शनीयः, सर्वे गुणाः काञ्चनमाश्रयन्ति ।।**[4]

चाणक्यः अपि वर्णयति यत् **अर्थार्थं प्रवर्तते लोकः ।**[5] अर्थात् गतानुगतिकं जगत् वर्तते, तस्मिन् समुपस्थिताः ये जनाः वर्तन्ते तेषां अर्थप्राप्तौ स्वाभाविकी प्रवृत्तिः ।

**कामः-**

काम इति शब्दः पुल्लिङ्गे वर्तते । काम्यते असौ इति कामः नाम इच्छा । कर्मणि घञ् प्रत्यये कृते कामशब्दनिष्पत्तिः । रघुवंशे कविकुलगुरुः महाकविः कालिदासः वक्ति यत् –

**सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।।**[6]

अत्र कामं वरं प्रतिश्रुत्य प्रतिज्ञाय इत्यर्थः । कामो नाम मनोरथः ।

**Kama is fulfilling ones desires. Desires are in various forms – to be wealthy, powerful, recognition, service, etc. The Kama purushartha advocates that one's desires in this lifetime need to be fulfilled, albeit in a state of awareness and without harming anyone in the process.**

मनुमहर्षिणा स्मृतौ उक्तम् यत् –

**न जातु कामः कामानामुपभोगेन शाम्यति ।**

**हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ।।[7]**

प्रायः जनाः मन्यन्ते यत् – विषयोपभोगेन कामः शाम्यति, किन्तु जन्तोः कामाः उपभोगेन न शाम्यति, अपितु वर्धते एव । अत्र मनुना दृष्टान्तं प्रदत्तं तद्यथा प्रज्वलिते अग्नौ घृतहोमेन अग्निः न शाम्यति अपितु विवर्धते तथैव विषयोपभोगेन कामः न शाम्यति अपितु विशेषेण वृद्धिमवाप्नोति । अतः कामशान्तये विषयोपभोगवृत्तिं परित्यज्य शमदमादिसाधनेन संयमो पालनीयः ।

भगवतो ध्यानाभ्यासनतत्परः भक्तः श्रीहरेरक्षरपरत्वादिमहिमानं ज्ञात्वा आत्मबुद्ध्या स्वं सम्प्राप्तसकलमनोरथं मन्येत् । तदुक्तं च हरिवाक्यसुधासिन्धोः दुर्गपुरप्रथमप्रकरणस्य पञ्चदशतरङ्गे यथा –

**महन्माहात्म्यमीशस्य विबुध्यात्मानमात्मना ।**

**मन्येत पूर्णकामं च ध्यानाभ्यासपरायणाः ।।[8]**

सकामिनिष्कामिनोः मध्ये निष्कामिनो नाम पूर्णकामो भक्तः श्रेष्ठः ।

**मोक्षः-**

धर्मार्थकाममोक्षेषु चतुर्विधेषु पुरुषार्थेषु मानवजीवनस्य अन्तिमं प्रमुखं लक्ष्यं मोक्षप्राप्तिरेव कल्पिता भारतीयसंस्कृतौ । यावदायुष्यं मनुष्यः विविधासु समस्यासु निमग्नो भूत्वा दुःखमवाप्नोति, एतासां सर्वासां समस्यानां मूलं तुं जन्ममरणचक्रमेव वर्तते ।

भारतीयैः ऋषिमुनिभिः बहूनि शास्त्राणि विरचितानि । साम्प्रतकालेऽपि आधुनिकाः बौद्धिकाः लौकिकार्थदर्शकानि अलौकिकविचारविमर्शकाणि च शास्त्राणि विरचन्ति । एतेषु सर्वेषु ग्रन्थावलिषु लौकिकविषयदर्शकानि शास्त्राणि बहुसङ्ख्यकानि सन्ति । जीवानां कल्याणपथप्रदर्शकाणि शास्त्राणि अल्पसङ्ख्यकानि भवन्ति । मोक्षस्वरूपनिरूपकेषु शास्त्रेष्वपि विभिन्नानि मतानि सन्ति । अतः मोक्षमार्गः गहनः प्रोक्तः । मोक्षस्य परिभाषानुगुणं साधनविचारः शास्त्रेषु दृश्यते ।

मोक्षप्राप्तिस्तु भगवद्कृपया भवति । केवलं स्वात्मबलेन प्राप्तुं न शक्यते । परमात्मप्राप्तिरूपो मोक्षः परमात्मकृपया एव प्राप्यते न तु केवलं स्वपुरुषार्थेण । तत्र प्रमाणं वर्तते कठोपनिषदि यत् –

**नाऽयमात्मा प्रवचनेन लभ्यः न मेधया न बहुना श्रुतेन ।**

**यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम् ।।[9]**

अयं परमात्मा बहुकृतेन प्रवचनेन बुद्ध्या वा बहुकथाश्रवणेन न लभ्यः, यमुपासकं एषः परमात्मा चिनोति तस्य कृते सः भगवान् स्वकीयां तनूं संदर्शयति । अर्थात् केवलं स्वपुरुषार्थेण परमात्मप्राप्तिः न अपितु परमात्मकृपया परमात्मप्राप्तिरूपो मोक्षः इति ।

संसारेऽस्मिन् सर्वेषां कृते परं प्राप्यः एक एव परमेश्वरः । महर्षिः बादरायणः ब्रह्मसूत्रे लिखति यत् – **अत एव चानन्याधिपतिः ।।**[10]

मुक्त्यवस्थायामपि **ब्रह्माऽहं कृष्णदासोऽस्मि** इति भावः मुक्तस्य तथैव तिष्ठति । एषः मम स्वामी, अहं तु सेवकः इति भावस्तु भगवद्धाम्नि अपि वर्तते । मुक्तस्तु भगवत्किङ्करः खलु । मुक्तः भगवद्धाम्नि दासभावेन यथेच्छरूपेण परमात्मनः सेवां विदधाति ।

भगवता श्रीस्वामिनारायणेन स्वलिखितशिक्षापत्र्यां मुक्तेः स्वरूपं स्पष्टीकृतं यत् –

**तत्र ब्रह्मात्मना कृष्णसेवामुक्तिश्च गम्यताम् ।।**[11]

भगवदाज्ञया तत् प्रसन्नतार्थे निष्कामभावेन यानि कर्माणि आचरितानि तानि सर्वाण्यपि क्रियमाणकर्माणि भक्तिरूपतामैति । अतः तानि कर्माणि बन्धनरूपाणि न भवन्ति ।

**सम्प्रति पुरुषार्थचतुष्टयस्य आवश्यकताः-**

अस्माकं समाजोपरि कर्तव्यस्य प्रगाढप्रभावो दरीदृश्यते । यावत्पर्यन्तं समाजे सर्वेऽपि जनाः स्वकर्तव्यपालनं न करिष्यन्ति, तावत् समाजस्योन्नतिः अशक्या एव । यदि वयं आदर्शसमाजनिर्माणं वाञ्छामश्चेत् प्रथमन्तावत् सर्वैः स्वकर्तव्यपालनम् सम्यक्तया कर्तव्यम् आपतति । तच्च धर्मावबोधं विना कथं कर्तव्याकर्तव्यज्ञानम् ? आदर्शसमाजनिर्माणे अस्माभिस्सर्वैः देवसदृशैः भाव्यम् । धर्मावलम्बनेन विना कथं विवेकबुद्धिः समुदेति । तत एव देवसदृशं मानवजीवनम् ।

अर्थनिर्भरं सकलं जगत् । विनार्थं न किमपि सिद्ध्यति । लोकेऽस्मिन् अर्थेनैव गौरवं दरीदृश्यते । सार्थं मनुष्यमेव सर्वे जनाः पूजयन्ति । स्वार्थपरार्थहेतवेऽपि अर्थसिद्धिरावश्यकी ।

शुभाशुभकामनया प्रवर्तितोऽयं प्रपञ्चः । विना कामनया न कोऽपि प्रवर्तते कर्मणि मनुष्यः । स्वपरकामनयैव मनुष्याणां प्रवृत्तिः ।

चतुर्विधपुरुषार्थेषु वास्तविकरूपेण मोक्ष एवाऽस्माकं परमं लक्ष्यम् । जन्मनैव दुःखसंश्लेषः, यदा जन्ममरणशून्यो भवत्युपासकः तदैव दुःखानामत्यन्ताभावः ।

शास्त्रानुरीत्या चतुर्विधपुरुषार्थप्राप्तये सर्वेषामपि मनुष्याणां प्रवृत्तिस्स्यात् चेत् पुरुषार्थसिद्ध्या सहास्माकं राष्ट्रस्यार्थिकविकासः, सामाजिकविकासः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागः, एकतायाः समर्थनं तद्रक्षणञ्च, प्रादेशिकधार्मिकभेदेभ्यः परं स्थित्वा **वसुधैव कुटुम्बकम्** इति समानबन्धुत्वभावनायाः वृद्धिः, प्राकृतिकपर्यावरणरक्षा तत्सुधारणा च अवश्यंभाविनी ।

**सन्दर्भग्रन्थाः-**


(1) श्रीमद्भागवतम् – स्कन्धः-10, अध्यायः-87, श्लोकः-2

(2) शिक्षापत्री – 103

(3) श्रीमद्भगवद्गीता – अध्यायः-3, श्लोकः-21

(4) नीतिशतकम् – श्लोकः- 37

(5) चाणक्यसूत्रम् – 509

(6) रघुवंशः –_सर्गः-2, श्लोकः-67

(7) मनुस्मृतिः -_अध्यायः-2, श्लोकः-94

(8) श्रीहरिवाक्यसुधासिन्धुः- तरङ्गः-15, श्लोकः-8

(9) कठोपनिषत् - वल्ली-2, मन्त्रः-23

(10) ब्रह्मसूत्रम् -_अध्याय-4, पाद-4, सूत्र-9

(11) शिक्षापत्री – श्लोक- 121